## अध्याय :- ५९ Chapter-59 

शौनक उवाच[1] ।।

[2]अत्यद्भुतमिदं सूत गुप्तक्षेत्रस्य पावनम् ।।
महन्माहात्म्यमतुलं कीर्तितं हर्षवर्धनम् ।। १

पुनर्यत्सिद्धलिंगस्य पूर्वं माहात्म्यकीर्तने ।।
इत्युक्तं यत्प्रसादेन सिद्धमातुस्तसेत्स्यति ।। २

विजयोनाम पुण्यात्मा साहाय्याच्चंडिलस्य चाः ।।
कोन्वसौ चंडिलोनाम विजयोनामकस्तथा ।। ३

कथं च प्राप्तवान्सिद्धिं सिद्धमातुः प्रसादत्[3] ।।
एतदाचक्ष्व तत्त्वेन श्रोतुं कौतूहलं हि नः ।। ४

सतां[4] चरित्र श्रवणे[5] कौतुकं कस्य नो भवत् ।।
उग्रश्रवा उवाच[6] ।।
साधु पृष्टमिदं विप्रा दूरांतरितमप्युत ।। ५

श्रुतां द्वैपायनमुखात्कथां वक्ष्यामि चात्रवः ।।
पुरा द्रुपदराजस्य पुत्रीमासाद्य पांडवाः ।। ६

धृतराष्ट्रमते प्रश्रानादिंद्रप्रस्थं न्यवेशयन् ।।
रक्षिता वासुदेवेन कदाचित्तत्र पांडवाः ।। ७

---

१ अ. प्रतौ 'उवाच' नास्ति । ६ अ. प्रतौ 'उवाच' नास्ति ।
२ अ. ब. 'इत्युद्भुतं'
३ अ. प्रसादतः
४ अ. सात्तां
५ अ. श्रवणो

उपविष्टाः[१] सभामध्ये कथाश्चक्रुः पृथग्विधाः ।।
देवर्षिं पितृभूतानां राज्ञां चापि प्रकीर्तने ।। ८

क्रियमाणेऽथ तत्रागाद्भीमपुत्रो घटोत्कचः ।।
तं दृष्ट्वा भ्रातरः पंचवासुदेवश्च वीर्यवान् ।। ९

उत्थाय सहसा पीठादालिलिंगुर्मुदा युताः ।।
स च तान्प्रणतः प्रह्वो ववंदे भीमनंदनः ।। १०

साशिषं च ततो राज्ञा स्वोत्संग उपवेशितः ।।
आघ्राय स्नेहतो मूर्ध्नि प्रोक्तश्च जनसंसदि ।। ११

युधिष्ठिर उवाच ।।[२]
कुत आगम्यते पुत्र क्व चायं विलंबितस्त्वया ।।
कालः क्वचित्सुखं राज्यं कुरुषे मातुलं[३] तव[४] ।। १२

कंचिद्देवेषु विप्रेषु गोषु साधुषु सर्वदा ।।
हैडंबे नापकुरुषे प्रियमेतद्धरेश्च नः ।। १३

हैडंबस्य[५] वनं सर्वं तस्य ये सैन्यराक्षसाः ।।
पाल्यामानास्त्वया साधो वर्धते जनक्षेमकाः ।। १४

---

१ ब. उपतिष्टा
२ अ. प्रती इत्ययं पाठः नास्ति ।
  ब. उधिष्ठिर उ० ।।
३ ब. मातुले
४ ब. हते
५ अ. हिडंबस्य

कच्चिन्नंदति ते माता भृशं नः प्रियकारिणी ।।
कन्यैव या पुरा भीमं त्यक्त्वा मानं पतिं श्रिता[1] ।। १५

इति पृष्टो धर्मराज्ञा स्मयन्हैडंबिरऽब्रवीत् ।।
हते[2] तस्मिन्दुराचारे मातुलेऽस्मि नियोजितः ।। १६

तद्राज्यं शासने स्थाप्य दुष्टान्निर्धूनश्चराम्यहम् ।।
माता कुशलिनी देवी तपो दिव्यमुपाश्रिता ।। १७

मामुवाच सदा पुत्र पितृणां भक्तिकृद्भव ।।
सोऽहं मातृर्वचः श्रुत्वा मेरुपादात्समागतः ।। १८

प्रणामायैव भवतां भक्ति प्रह्वेण चेतसा ।।
आत्मनानं च महत्यर्थे कस्मिंश्चित्तु नियोजितम् ।। १९

भवद्भिरहमिच्छामि फलं यस्मादिदं महत् ।।
यदाज्ञापालनं पुत्रः[3] पितृणां सर्वदा चरेत् ।।
अथोर्द्ध्वलोकान्स जयेदिह जायेत कीर्तिमान् ।। २०

सूत उवाच ।।[4]
इत्युक्तवंतं तं राजा परिरभ्य पुनः पुनः ।।
उवाच धर्मराट् पुत्रमानंदाश्रुः सगद्गदम् ।। २१

---

१ ब. श्रुता
२ ब. हतो
३ अ. पुत्रं
४ अ. प्रतौ इत्ययं पाठः नास्ति ।

त्वमेव नो भक्तिकारी सहृदयश्चापि वर्तसे ।। २२

एतदर्थं च हेडंबे पुत्रानिच्छंति साधवः ।।
इहामुत्र तारयंते तादृशाश्चापि पुत्रकाः[1] ।। २३

अवश्यं यादशी माता तादृशस्तनयो भवेत् ।।
माता च ते भक्तिमती द्रढं नस्त्वं च तादृशः ।। २४

अहो सुदुष्करं देवीकुरुते मे प्रियावधूः ।।
या भर्तृश्रियमुल्लंघ्य तप एव समाश्रिता[2] ।। २५

नूनं कामेन भोगैर्वा कृत्यं वध्वा न मे मनाक् ।।
या पुत्रसुखमन्वीक्ष्य परलोकार्थमाश्रिता ।। २६

दुष्कुलीनापि या भक्ता सूतेऽपत्यं च भक्तिमत् ।।
कुलीनमेव तन्मन्ये ममेदं मतमुत्तमम् ।। २७

एवं बहूनि वाक्यानि तानि तानि वदन्नृपः ।।
धर्मराजः[3] समाभाष्य केशव वाक्यम ब्रवीत् ।। २८

---

१ अ. ब. 'पुत्रकः'
२ अ. ताः
३ ब. धर्मराज

पुंडरीकाक्ष जानासि यथा भीमादभूदयम् ।।
जातमात्रस्तु यश्चासीद्यौनस्थौ महाबलकः ।। २९

अष्टानां देव योनीनां यतो जन्म च यौवनम् ।।
सद्य एव भवेत्तस्मात्सद्योऽस्यासीच्च यौवनम् ।। ३०

तदस्यो[1] चितदारार्थे सदा चिंतास्ति कृष्ण मे ।।
उचितं बद हैडंबेस्वकलत्रं करोम्यहम् ।। ३१

तद्भवान्कृष्ण सर्वज्ञ त्रिलोकीमपि वेत्सि च ।।
हैडंबेरुचितां दाराः दारान्वक्तुमर्हसि त्व यादव ।। ३२

सूत उवाच ।।[2]
एवमुक्तो धर्मराज्ञा क्षणं ध्यात्वा जनार्दनः।।
धर्मराजमिदं वाक्यं पदांतरितम ब्रवीत् ।। ३३

अस्ति राजन्प्रवक्ष्यामि दारानस्योचितां शुभाम्[3] ।।
सांप्रतं संस्थिता रम्ये प्राग्ज्योतिषपुरे वरे ।। ३४

सा च पुत्री मुरोः पार्थ दैत्यस्याद्भुत कर्मणः[4] ।।
योऽसौ नरकदैत्यस्य प्राणतुल्यः सखाऽभवत् ।। ३५

---

१ ब. तदास्यो
२ अ. प्रतौ नास्ति ।
३ अ. शुभां
४ ब. कर्मणा

स च मे निहतो घोरः पाशदुर्गसमन्वितः ।।
नरकश्च दुराचारस्त्वमेतद्वेस्ति सर्वशः ।। ३६

ततो हते मुरौ दैत्ये मया तस्य सुताव्रजत् ।।
योद्धुं मामति वीर्यत्वाद्धिरा काम कंटकटा ।। ३७

तां ततोऽहं महायुद्धे खड्गखेटक धारिणीम् ।।
अयोधयं महाबाणैः सुशार्ङ्गधनुषश्च्युतैः ।। ३८

खडगेन चिच्छेद बाणाम्मम सा च मुरोः सुता ।।
समागम्य च खड्गेन गरुडं मुधर्न्यताडयत् ।। ३९

स च मोहसमाविष्टो गरुडोऽभूद चेतनः ।।
ततस्तस्या वधार्थाय मयाचक्रं समुद्यतम् ।। ४०

चक्रं समुद्यतं दृष्ट्वा मया तस्मिन्रणाजिरे ।।
कामाख्या नाम मां देवी पुरः[1] स्थित्वावचोऽब्रवीत् ।। ४१

नैनां हंतुं भवानर्हो रक्षैतां पुरुषोत्तम[2] ।।
अजेयत्वं[3] मयाह्यस्या दत्तं खड्गं च खेटकम् ।। ४२

---

१ ब. पुर

२ ब. मः

३ ब. आजयं तुम

बुद्धिर प्रतिमा चापि शक्तिश्च परमा रणे ।।
ततस्त्वया त्रिरात्रेऽपि न जितासीन्मुरोः सुता ।। ४३

एवमुक्ते तदा देवीं वचनं चाहम ब्रवम्[1] ।।
अयमेष निवृत्तोऽस्मि वारयैनां च त्वं शुभे[2] ।। ४४

ततश्चालिंग्य तां भक्तां कामाख्या वाक्यमब्रवीत् ।।
भद्रे रणान्नि वर्तस्य नायं हंतुं कथंचन ।। ४५

शक्यः केनापि समरे माधवो रणदुर्जयः ।।
नाभूदस्ति भविष्यो वा य एनं संयुगे जयेत् ।। ४६

अपि वा त्र्यंबकः पुत्रि नैन शक्तः कुतोऽन्यकः ।।
तस्मादेनं नमस्कृत्य भाविनं श्वसुरं शुभे[3] ।। ४७

रणादस्मान्निवर्तस्व तवोचितमिदं स्फुटम् ।।
अस्य भ्रातुर्हि भीमस्य स्नुषात्वं च भविष्यसि[4] ।। ४८

तस्मात्त्वं श्वशुरं भद्रे सम्मानय जनार्दनम् ।।
न च शोकस्त्वया कार्यः पितरं प्रति पंडिते ।। ४९

---

१ अ. ब्रवन्
२ अ. श्रुभे
३ अ. श्रुभे
४ ब. ति

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।।
बहवश्चास्य वेत्तारो वद केनापि वार्यते ।। ५०

ऋषींश्च देवांश्च महासुरांश्च त्रैविधविद्यान्पुरुषान्नृपांश्च ।।
कान्मृत्युरेको न पतेत काले परावरज्ञोऽत्र न मुह्यते क्वचित् ।। ५१

सर्वपातकनिर्मुक्तो गतोऽसौ धाम वैष्णवम् ।। ५२

एवं कामाख्यया प्रोक्ता सा च कामकंटकटा ।।
त्यक्त्वा क्रोधं च संवृत्य गात्राणि प्रणता च माम् ।। ५३

तामहं साशिषं चापि प्रावोचं[१] भरतर्षभ ।।
अस्मिन्नेव पुरे तिष्ठ भगदत्तः ~~कृते~~ ~~नृपः~~ प्रपूजितो ।। ५४

मया देव्या पृथिव्या च भगदत्तः कृतो[२] नृपः ।।
स ते पूजां बहुविधां करिष्यति स्वसूर्यथा ।। ५५

वसंती चात्र तं वीरं हैडिंबं पतिमाप्स्यसि ।।
एवमाश्वास्य तां देवीं मौर्वीं चाहं व्यसर्जयम् ।। ५६

---

१ ब. प्रवोचं
२ ब. कृपो

सा स्थिता च पुरे तत्र गतोऽहं शक्रसद्म च ।।
ततो द्वारवतीं प्राप्य त्वया सह समागतः ।। ५७

एवमेषा ोचिता दारा हैडंबैर्विद्यते शुभा[१] ।।
कामाख्ये च रणे घोरा या विद्युदिव भासते ।। ५८

न च रूपं वर्णितं मे श्वसुरस्यो चितं यतः[२] ।।
साधोर्हि नैतदुचितं सर्वस्त्रीणां प्रवर्णनम् ।। ५९

पुनरेकश्च समयः कृतस्तं शृणु यस्तया[३] ।।
यो मां निरुत्तरां प्रश्ने कुर्याच्चैव विजयेत्पुमान् ।। ६०

यो मे प्रतिबलश्चापि स मे भर्ता भविष्यति ।।
एवं च समयं श्रुत्वा बह्वो दैत्य राक्षसाः ।। ६१

तस्या जयार्थमगमंस्तेऽपि जित्वाहतास्तया ।।
बह्नेरिव प्रभां दीप्तां पतंगानां समुच्चयः ।। ६२

एवमेतादृशीं मौर्वीं जेतुमुत्सहते यदि ।। ६३

---

१ अ. श्रुभा
२ अ. सतः ब. सुतः
३ ब. तथा

घटोत्कचो महावीर्या भार्यास्य नियतं भवेत् ।। ६४

युधिष्ठिर उवाच ।।[१]
अलं सर्वगुणैस्तस्या यस्यास्त्वेको गुणो महान् ।।
क्रियते किं हि क्षीरेण यद्विषमिश्रितम् ।। ६५

प्राणाधिकं भीमसेनिं कथं केवलसाहसात् ।।
क्षिपेयं तव वाक्यानां शुद्धानां चाथ कोविदम् ।। ६६

अन्या अपि स्त्रियः संति देशे देशे जनार्दन ।।
बह्वयस्तासां वरां कांचिद्योषितं वक्तुमर्हसि ।। ६७

भीम उवाच ।।[२]
सम्यगुक्तं केशवेन वाक्यं बह्वर्थमुत्तमम् ।।
राज्ञा पुनः स्नेहवशाद्यदुक्तं तन्न भाति मे ।। ६८

कार्ये दुःसाध्य एव स्यात्क्षत्रियस्य पराक्रमः ।।
करींद्रस्यैवयूथेषु गजानां न मृगेषु च ।। ६९

आत्मा प्रख्यातिमानेयः सर्वथा वीरपुंगवैः ।।
सा च ख्यातिः[३] कथं जाये दुःसाध्यकरणादृते ।। ७०

---

१ अ. प्रतौ इत्ययं पाठः नास्ति ।
२ अ. प्रतौ इत्ययं पाठः नास्ति ।
३ ब. ख्याति

न ह्यात्मवशगं पार्थ हैडंबिरस्य रक्षणम् ।।
येन क्रूर- दत्तस्त्वयं[१] धात्रा स एनं पालयिष्यति[२] ।। ७१

सर्वथौच्च पदारोहे यत्नः कार्यो विजानता ।।
तन्न सिध्यति चेद्दैवान्नासौ दोषो विजानतः ।। ७२

यथा देवव्रतस्त्वैको जह्ने काशिसुताः पुरा ।।
तथैक एव हैडंबिर्मौर्वी प्राप्नोतु मा चिरम् ।। ७३

अर्जुन उवाच[३] ।।
केवलं पौरुषं परं भीमेनोक्तमिदं वचः ।।
अबलं दैवहेतुत्वात्प्रबलं प्रतिभाति मे ।। ७४

न मृषा हि वचो ब्रूते कामाख्या या पुराऽब्रवीत् ।।
भीमसेनसुतः पाणिं[४] तव भद्रे[५] ग्रहीष्यति[६] ।। ७५

अनेन हेतुना यातु शीघ्रं तत्र घटोत्कचः ।।
इति मे रोचते कृष्ण तव किं ब्रूहि रोचते ।। ७६

कृष्ण उवाच ।।[७]
रोचते मे वचस्तुभ्यं भीमस्य च महात्मनः ।।
न हि तुल्यौ भीमसेने बुद्धौ वीर्ये च कश्चन ।। ७७

---

१ ब. दत्तः स्वयं
२ अ. पातयिष्यति
३ अ. प्रतौ उवाच नास्ति ।
४ अ. पाणि
५ ब. भद्रे
६ ब. करिष्यति
७ अ. श्री भगवान ।। ब. श्री भगवां०

अंतरात्मा च मे वेत्ति प्राप्तामिव मुरोः सुताम् ।।
तच्छीघ्रं यातु हैडंबिस्त्वं च किं पुत्र मन्यसे ।। ७८

घटोत्कच उवाच[१] ।।
न हि न्याय्याः[२] स्वका वक्तुं पूज्यानामग्रतो गुणाः ।।
प्रवृत्ता एव भासंते सद्गुणाश्च रवेः कराः ।। ७९

सर्वथा तत्करिष्यामि पितरौ येन मेऽमलाः ।।
लज्जिष्यंति न संसत्सु मया पुत्रेण पांडवाः ।। ८०

एवमुक्त्वा महाबाहुरुत्थाय प्रणनाम तान् ।।
जयाशीर्भिश्च पितृभिर्वर्द्धितो गंतुमैच्छत ।। ८१

तं गंतु काम माहेदमभिनंद्य जनार्दनः ।।
कथा कथनकाले मां स्मरेथास्त्वं जयावहम् ।। ८२

यथद्य बुद्धिं सुदुर्भेद्यां वर्धयामि बलं च ते ।।
इत्युक्त्वा लिंग्यतं कृष्णो व्यसर्जत साशिषम् ।। ८३

ततो हिडंबातनयो महौजाः सूर्याक्षकालाक्षमहोदरानुगः ।।
वियत्पथं प्राप्य जगाम तत्पुरं प्राग्ज्योतिषं नाम दिनव्यपाये।। ८४

[३] इति श्री स्कांदे..... बर्बरिकोपाख्याने घटोत्कचस्य प्राग्ज्योतिषपुरं प्रति गमनवर्णनं नामैकोनषष्टितमोऽध्यायः ।।

---

१ अ. प्रतौ उवाच नास्ति ।
२ ब. न्याया
३ अ. इति कुमारिका खंडे ।
ब. इति श्री स्कंद पुराणे कुमा० नवपंशोऽध्यायः ।।५९।।